International Journal of Sanskrit Research 2024; 10(2): 151-157

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(2): 151-157
© 2024 IJSR
www.anantaajournal.com
Received: 16-12-2023
Accepted: 19-01-2024

**डॉ. प्रदीप्तकुमारनन्द**
सर्वदर्शनविभागाध्यक्ष, श्री जगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा, भारत

Corresponding Author:
**डॉ. प्रदीप्तकुमारनन्द**
सर्वदर्शनविभागाध्यक्ष, श्री जगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा, भारत

# भारतीयदर्शने शब्दतत्त्वविवेचनम्

**डॉ. प्रदीप्तकुमारनन्द**

**सारांश**

भारतीयदर्शने शब्दो ध्वनिः, ज्ञानप्राप्तेः साधनम् । दर्शनेषु शब्दस्य अतिप्राचीनपवित्रग्रन्थवेदैः सह समीकरणं भवति । वेदो नित्यः, अपौरुषेयो निरपेक्षः इति सर्वथा मन्तव्यः। व्याख्यानात्मके मीमांसाविद्यालये शब्दस्य महत्त्वं समर्थितम् । मीमांसा प्रयोगात्मकं कर्म उपदिशति, शास्त्रीयवाक्येषु तान् प्रयोजयति, मीमांसायाः प्रभावशीलता शब्दज्ञानमाध्यनेन परिचीयते । न्यायनये शब्दः अनित्य पौरुषेयः मन्यते । बौद्धजैनाः यद्यपि वेदानाम् अस्तित्वं प्रामाण्यत्वं तिरस्कुर्वन्ति तथापि वस्तुतः स्वशास्त्रं शब्दाश्रयं मन्यन्ते । वैयाकरणाः शब्दो ब्रह्म स्वीकुर्वन्ति । अयं शब्दः कुत्र ध्वनिः, कुत्र स्फोटः, कुत्र नाद इति वर्तमाना सततं जागर्ति ।

सामान्यतया शब्दस्य अनेकाः प्रकाराः अर्थाः भवन्ति । शब्दः व्यापकार्थे ध्वनिः । यथा मृदंगस्य ध्वनिः, घण्टानादः, रेलयानस्य शब्दः इत्यादयः। अत्र शब्देन शब्दमात्रं अवगच्छामः। एषः ध्वन्यात्मक उच्यते । यदा तु शब्देन सह अक्षरमपि श्रूयते तदा तत् वर्णात्मकशब्द उच्यते। यथा क, ख, ग इत्यादयः । एते द्विविधाः – सार्थकाः निरर्थकाश्च । आद्यः सार्थकः अपरो निरथकः। शब्दो वस्तु सूचयति, यथा घटशब्दः 'घटः' पटशब्दः 'पट' इति वस्तु सूचयति । एते सार्थकाः, येषां वस्तुनिरूपणशक्तिः विद्यते । ऋषिवाक्यमपि शब्दसंज्ञा प्रदीयते । शब्दार्थयोः मध्ये कोऽपि सम्बन्धोऽस्ति वा न वेति विषये भारतीये वैयाकरण-साहित्य-दार्शनिकानां मध्ये पर्याप्ताः मतभेदाः । तेषां स्वरूपाणि दिङ्मात्ररूपेण प्रदर्शयितुमस्य शोधनिबन्धस्य अयमारम्भो जातः ।

**कूटशब्दाः** शब्दः, ध्वनिः, स्फोटः, आगमः, प्रमाणम्, शब्दार्थः, विवर्तः, विकारः

## प्रस्तावना

वाक्यपदीयम् इत्ययं दर्शनग्रन्थः व्याकरणशास्त्रे बहुप्रसिद्धः,बहुपुरस्कृतश्च । अत्र त्रीणि काण्डानि सन्ति । ब्रह्मकाण्डम्,पदकाण्डम्, वाक्यकाण्डम् इति । ब्रह्मकाण्डे भर्तृहरिः प्रायः १५५ श्लोकेषु शब्दब्रह्मणः स्वरूपं वर्णयति । संक्षेपतः वैयाकरणैः अङ्गीकृतः 'स्फोट' इति पदार्थ एव शब्दब्रह्म इति तेन निरूपितम् ।

सर्वे वैयाकरणास्तावत् स्फोटवादस्य समर्थकाः सन्ति । असौ स्फोटः अनादिः, अनन्तः, अक्षरश्च । विवर्तः शब्दार्थस्वरूपः । परिणाम-विवर्तयोः परिभाषाभेदः स्वीकृतः । विवर्तो नाम अतात्त्विकज्ञानम्, स्वरूपपरित्यागेन वस्त्वन्तरप्रतीतिः मायामयः शुक्तौ रजतज्ञानवत् ।

रज्वां सर्पभ्रमवत् । परिणामोऽत्र तात्विकविकारः । दुग्धस्य दधिरूपेण परिणमनम् । अत्र स्वस्वरूपत्यागपूर्वकं स्वरूपान्तरग्रहणं विकारः । शब्दार्थः तावत् शब्दस्य विवर्तरूप इति भर्तृहरिणा समर्थितम् । तथाहि वाक्यपदीये-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥[1]

विवर्त-विकाररोः लक्षणं सदानन्दयोगिन्द्रेण वेदान्तसारे-

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः ॥[2]


अद्वैतवेदान्तिनां मते तत्त्वभूते ब्रह्मणि चराचरात्मकमेतत् जगत्प्रतीतिः परिणाम इति न कल्पितुं शक्यते । तथा सति ब्रह्मणः परिणामित्वं स्यात् । तेन च तस्य अनित्यत्वं, अतो नास्य परिणामित्वम् । अतो जगदेतद् ब्रह्मणो विवर्तमेवेति निश्चितम् , विवर्तस्वीकारे तु नायं कश्चिद्दोष उत्पद्यते । तमपसार्य नित्यप्रकाशरूपो ब्रह्मणो यथार्थज्ञानम् अपवाद इत्युच्यते । सांसारिकप्रपञ्चस्य स्वस्वकारणे लयपूर्वकं क्रमशो मिथाप्रतीतिर्निराशे सति ब्रह्ममात्रावशिष्टे यथार्थप्रतीतिर्जायतेति वेदान्तनिर्घोषः ।
अस्य शब्दब्रह्मणः सृष्टिरजायत, अथवा इयं सृष्टिः शब्दस्य परिणामभूता । सृष्ट्यादौ छन्दोमयीवाग्भ्यः विवर्तभूतमिदं विश्वम् । यदुक्तं भर्तृहरिणा-

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥[3]

भर्तृहरिणा वैखरी मध्यमा पश्यन्ती चेति शब्दस्य त्रयो भेदा उक्ताः । नागेशः परा नाम चतुर्थो भेदः उक्तः । किन्तु भर्तृहरिः पश्यन्त्यां परान्तर्भूता, नाधिका मन्यते । पश्यन्त्यारयं संसारः प्रपञ्चः सृष्ट इति वैयाकरणानां सृष्टिप्रक्रिया । सृष्ट्यादौ नित्यं सर्वव्यापि शब्दब्रह्म पश्यन्तीवाणीरूपं तिष्ठति । अनन्तशक्तियुक्तं तत् मायामयो भूत्वा नामरूपात्मकं जगत्सर्वं करिष्यामीति मनसि संकल्पं करोति। ततः कलानाम्नी स्वतन्त्रशक्त्या पञ्चतन्मात्राणि सृजति, तस्मात् पञ्चमहाभूतानि, तदनन्तरं समग्रा सृष्टिः विस्तारयति । शब्दब्रह्मणः सृष्टेरारम्भः तस्मिन्नेव सृष्टेरन्तः । यच्चोक्तम्-

तथेदममृतं ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं भेदरूपं विवर्तते ॥
ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।
विवृतं शब्दमात्राभ्यस्तास्वेव प्रविलीयते ॥[4]

भारतीयदर्शने शब्दतत्त्वं मुख्यतया प्रमाणान्तर्भूतं भवति । तत्र नवविधानि प्रमाणानि उक्तानि । तत्र प्रमा नाम यथार्थज्ञानम् । तस्याः प्रमायाः यत्करणं तदेव प्रमाणम् । वैयाकरणाः अभ्यास-अदृष्ट-प्रतिभा-प्रत्यभिज्ञा-कोशभेदेन पञ्च अधिका मन्यन्ते ।



इन्द्रियसंयोगेन प्राप्तं वस्तुज्ञानम् असौ घट इति प्रत्यक्षम् । लिङ्गस्य (लक्षणस्य) ज्ञानेन लिंगिनो (लक्ष्यस्य) च ज्ञानं पर्वतो वह्निमान् धूमात् इत्यनुमानम् । गो सदृशो गवयः इति सादृश्यज्ञानमुपमानम् । महापुरुषवचनं नदीतीरे पञ्चफलानि सन्तीति शब्दप्रमाणम्। दृष्टस्य श्रुतस्य च द्वयोः विषययोः अर्थज्ञानं यद्विना न सम्भवति तदेव अर्थापत्तिप्रमाणम् यथा– 'पीनोऽयं देवदत्तः दिवा न खादति' इत्यत्र दिवाभोजनाभावे रात्रिभोजनमपेक्षते । न उपलब्धिः अनुपलब्धिः अभावो वा, यथा- 'इह भूतले घटो नास्ति', व्यापके व्याप्यस्य, अङ्गिनि अङ्गस्य च स्थितिः सम्भवप्रमाणम्, पौराणिकाः मन्यन्ते। 'रामो राजा आसीदि'ति ऐतिह्यं ऐतिहासिका मन्यन्ते । चेष्टाप्रमाणं तान्त्रिकाः स्वीकुर्वन्ति। संप्रति शब्दप्रमाणं निरूप्यते । व्युत्पत्त्यर्थदृष्ट्या शब्दस्यार्थः ध्वनिः । शब्दयति इति शब्दः । सामान्यतया शब्द-पदयोः पर्यायवाची मन्यते । बहवो दार्शनिकाः शब्दस्यार्थः अवबोधकः मन्यन्ते । शपत्यर्थम् आह्वयति प्रत्याययति, शप्यते येन शपनमात्रं वा शब्दः । वैयाकरणाः सुप् तिङन्तविभक्तियुक्तशब्दः पद इति उच्यन्ते । पदसमूहः वाक्यम् । तत्र आप्तवाक्यं शब्दः, आप्तस्तु यथाभूतस्यार्थस्य शब्दप्रमाणस्य अयमर्थः- Similarly śabda-pramāṇa means as soon as there is evidence in the Vedic literature, "This is this," you have to accept. That's all. Then your knowledge is perfect because you are accepting things from the perfect source.[5] उपयुक्तेन पुरुषेण गृहीतं प्रवचनं शब्दनाम्ना अभिधीयते । । तस्मात् 'आप्तोपदेशः शब्दः' [6] आप्तः नाम सर्वज्ञानस्य च यथार्थस्वरूपं विजानाति, अन्यार्थेन यः सत्यवादी अस्ति । न्यायमते वेदाः ईश्वरप्रेरिताः शास्त्राणि ईश्वरकृतानि । असौ सर्वज्ञः, सुखप्रदाता, जगतः शुभचिन्तकः च अस्ति । सः कदापि मिथ्यावक्तुं न शक्नोति । मनुष्यहिताय तादृशेन ईश्वरेण निर्मितः परमसत्यस्य व्याख्यानं वेदः असौ शब्दप्रमाणम् । अन्यत्र आप्तवाक्यं शब्दः, आप्तस्तु यथाभूतस्यार्थस्य उपदेष्टा पुरुषः । वाक्यं तु आकांक्षायोग्यतासन्निधिमतां पदानां समूहः [7] । यथार्थाभिधानं शब्दः [8] इति जैनाः । आप्तः खलु साक्षात् कृतधर्मा, यथार्थवक्ता [9] इति अन्नंभट्टः । वाक्यार्थज्ञानं शब्दप्रमाणमिति गंगेशोपाध्यायाः । प्राचीननैयायिकानां नये अर्थपूर्णवाक्यानां कृते आकांक्षायोग्यतासन्निधिनाम् आवश्यकमस्ति । नव्याः तात्पर्यज्ञानस्य प्राधान्यतां अधिकं मन्यन्ते। आप्तश्रुतिराप्तवचनं [10] तु सांख्याः । जयमंगलाकारेण आप्तलक्षणं व्यधायि-


स्वकर्मण्यभियुक्तो यो रागद्वेषविवर्जितः ।
निर्वैरः पूजितः सद्भिराप्तो ज्ञेयः एतादृशः ॥ [11]

वाचस्पतिमिश्रमतेन येषां वचनानि वेद-स्मृतिभिः अप्रमाणितानि ते न आप्तपदवाच्याः, यथा बौद्धजैनादयः । योगदर्शने शब्द आगमनाम्ना प्रसिद्धः । व्यासभाष्ये- 'स्वबोधसंक्रान्तये शब्देनोपदिश्यते शब्दात् तदर्थविषयावृत्तिः श्रोतुरागमः' [12] इति । मीमांसाभाष्यकारेण शबरस्वामिना यदुक्तं-अथ गौरित्यत्र कः शब्दः? गकारौकार विसर्जनीया इति भगवानुपवर्षः । [13] अकारादिवर्णः शब्दः । वक्तुः कंठताल्वादिस्थानेभ्यः समुद्भूतेन नादेन अभिव्यज्य श्रोतुः श्रोत्रेन्द्रियेण श्रवणीयं तत्त्वं शब्द इति मीमांसकाः । कुमारिलमते यत् शास्त्रं तदेव शब्द इति । विज्ञाताच्छब्दात् पदार्थाभिधानद्वारेण यत् वाक्यार्थविज्ञानं तच्छब्दं नाम प्रमाणम् । [14] नैयायिकाः शाब्दबोधनिमित्तं पदज्ञानं करणमिति कथयन्ति । तथाहि-

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥ [15]

पदजन्यपदार्थस्मरणं व्यापारः । तस्मिन्नेव शक्तिरस्ति । शब्दार्थयोः परस्परं स्मृत्यनुकूलसम्बन्धः वृत्तिः । सा शक्ति-लक्षणाभेदेन द्विविधा । शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। स च अस्मात् शब्दात् अयमर्थः बोद्धव्यः इति ईश्वरेच्छारूपः । धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवति । तदुक्तम्-


शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः ॥ [16]




पदनिष्ठशक्तिग्रहस्तु शक्तिनिष्ठं शक्तम् । शक्तं पदम् । न्यायनये द्विविधं पदं मुख्यं गौणं चेति । यच्छक्तिवृत्त्या यमर्थमुत्थापयति तत्तस्मिन्नर्थे मुख्यं गोघटादिपदम् । तच्चतुर्विधम् । यौगिक-रूढ-योगरूढ-यौगिकरूढम् चेति । लक्षणावृत्त्या यमर्थमुत्थापयति तत्तस्मिन्नर्थे गौणं यथा 'गंगायां घोषः' इत्यत्र तीरोपस्थापकं गगापदम् ।

शब्दस्य अर्थबोधकशक्तिः शब्दशक्तिः । इयं शक्तिः कदाचित् वृत्तिः कदाचित् च व्यापारनाम्ना अभिधीयते ।


मीमांसकानां नये जातौ एव शक्तिर्वर्तते न व्यक्तौ । व्यक्तौ शक्तिस्वीकारे शक्तेरानन्त्यापत्तिः । एतेषां नये शब्देषु अर्थशक्तिः निहितः अस्ति । शब्दस्य अर्थेन च सम्बन्धः शाश्वतः, प्रकृत्या नित्यः नियतं तिष्ठति । शब्दशक्तिविषये नैयायिकानां वैयाकरणानां आलंकारिकाणां मध्ये च बहुविवादः वर्तते । एतद्विषये वैयाकरणां मीमांसकैः सह द्विमतं नास्ति । शब्दार्थयोः सम्बन्धः लोकप्रयोगात् एव ज्ञेयः। किन्तु नैयायिकानां मतैकं विद्यते । साहित्यिकानां नये वाचक-लाक्षणिक-व्यञ्जकभेदेन त्रिविधः शब्दः । त्रिसृणां शब्दानां अभिधा-लक्षणा-व्यञ्जनाभेदेन तिस्रः शक्तयः ।




तत्र नामार्थप्रदातृशक्तिः अभिधा । इयं शब्दस्य प्रथमा शक्तिः । यया शक्त्या शब्दः प्रत्यक्षनिर्देशितः (शब्दार्थः पूर्वज्ञातः) सा अभिधा। यथा-वृषभः ज्ञातः । अत्र वृषभशब्दः पशुविशेषः , शब्दकोशाद् पूर्वमेव ज्ञातः । अत्र शब्द-शब्दार्थयोः कापि बाधा नास्ति ।

अभिधा यदा शब्दार्थनिर्णये असमर्था तदा येन सामर्थेन शब्दार्थः अवगम्यते सा लक्षणा । अस्याः त्रिविधः पन्था । १.मुख्यार्थे बाधः २.मुख्यार्थस्य लक्ष्यार्थेन सह सम्बन्धः ३. रूढि (प्रसिद्धार्थः) प्रयोजनम् अभिप्रायो वा । गंगायां घोषः इत्यत्र गंगानद्याम् आभीरपल्ली असम्भवात् मुख्यार्थो बाधः । गंगातीरमत्र लक्ष्यार्थः । गंगातीरे शवरपल्ली अस्तीति शब्दशक्तिरत्र । साहित्यिकाः रूढी प्रयोजनवतीभेदेन द्विविधा मन्यन्ते । रूढी गद्यपद्यभेदेन द्विविधा । प्रयोजनवती गौणी शुद्धाभेदेनापि द्विविधा । लक्षणा शक्यसम्बन्धरूपेति नैयायिकाः । सा जहत्स्वार्था अजहत्स्वार्था भेदेन द्विविधा ।

अभिधा यदा शब्दार्थनिर्णये असमर्था तदा येन सामर्थेन शब्दार्थः अवगम्यते सा लक्षणा । अस्याः त्रिविधः पन्था । १.मुख्यार्थे बाधः २.मुख्यार्थस्य लक्ष्यार्थेन सह सम्बन्धः ३. रूढि (प्रसिद्धार्थः) प्रयोजनम् अभिप्रायो वा । गंगायां घोषः इत्यत्र गंगानद्याम् आभीरपल्ली असम्भवात् मुख्यार्थो बाधः । गंगातीरमत्र लक्ष्यार्थः । गंगातीरे शवरपल्ली अस्तीति शब्दशक्तिरत्र । साहित्यिकाः रूढी प्रयोजनवतीभेदेन द्विविधा मन्यन्ते । रूढी गद्यपद्यभेदेन द्विविधा । प्रयोजनवती गौणी शुद्धाभेदेनापि द्विविधा । लक्षणा शक्यसम्बन्धरूपेति नैयायिकाः । सा जहत्स्वार्था अजहत्स्वार्था भेदेन द्विविधा ।




## उपसंहार

अस्मन्मते शब्दः नित्यः, अनादि अनिर्वचनीयः सत्यस्वरूपः। शब्देन सह शब्दार्थस्यापि तादृशः सम्बन्धः मन्तव्यः । शब्दार्थं विहाय शब्दः कदाचित् स्थातुं न पारयति । यदि स्थास्यति चेत् निरर्थक एव । अर्थविहीनस्य शब्दस्य न शब्दार्थेन सह सम्बन्धः समवायः साध्यते । प्रमाणसंज्ञां संप्राप्य शब्दः शब्दार्थं जनयति । पूर्वसंस्कारवशात् येन केनापि अर्थेन भवतु पदार्थाः सार्थकाः व्यञ्जका भजन्ते । कदम्बमुकुलन्यायेन शब्दाः गतिशीलाः इति तेषां प्रतिक्षणं विपरिणमनम् इति प्रथमे, अनित्यत्वमिति द्वितीये क्षणिकत्वमिति तृतीये च पक्षविषये सम्यग् विचारणीयम् ।

## सन्दर्भ सूची


1. वाक्यपदीये,१/१
2. वेदान्तसारे
3. वाक्यपदीये,१/१२०
4. वाक्यपदीये,१/१
5. Lecture on BG 2.8-12 -- Los Angeles, November 27, 1968:
6. न्यायसूत्रम्-१/१/७
7. तर्कभाषा पृ १४९

8. तत्त्वार्थाधिगमसूत्रे-१/३५
9. तर्कसंग्रहे
10. सांख्यकारिका
11. जयमंगलाटीका
12. यो.सू.व्या.भा.
13. शावरभाष्यम्,१/१५
14. शास्त्रदीपिका,पृ १३४
15. मुक्तावली ८१
16. सिद्धान्तमुक्तावली,पृ१५७